# मनोगतम् [०२.२२] 'मनकीबात', प्रसारण-तिथिः- २८-मार्च,२०२१

[भाषान्तरम् - डॉ.श्रुतिकान्तपाण्डेय- डॉ.गवीशद्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

मम प्रियाः देशवासिनः, नमस्कारः! साम्प्रतिके क्रमे, 'मनकीबात'-प्रसारणस्य कृते, यान्यपि पत्राणि आयान्ति, टिप्पण्यः आगच्छन्ति, विभिन्न-प्रकारकाः विनिवेश्य-सन्दर्भाः च प्राप्यन्ते, यदाहम् एतान् अवलोकयन् आसम्, तदावगतं यत् अनेके जनाः महत्वपूर्णं वृत्तमेकं स्मृतवन्तः | MyGov-इत्यत्र आर्यन्-श्रीः, बेंगलुरुतः अनूप-रावः, नोएडा-तः देवेशः, ठाणेतः सुजीतः, चैते सर्वेऽपि अकथयन् - मोदिमहोदय! 'मनकीबात'-प्रसारणस्य साम्प्रतिकमिदं पञ्चसप्ततितमम् आख्यानं वर्तते, एतदर्थं भवते वर्धापनम् | भवद्भ्यः भूरिशो धन्यवादान् व्याहरामि यत् भवन्तः एतावत्या सूक्ष्मदृष्ट्या 'मनकीबात'-प्रसारणम् अनुसृतवन्तः, आत्मानञ्च संयोजितवन्तः | मम कृते नूनमयं गर्वविषयः, भूयान् चानन्द-विषयः | मम पक्षतोऽपि, भवतां कृते तु धन्यवादः नूनमस्त्येव, 'मनकीबात'-प्रसारणस्य सर्वेषां श्रोतॄणाम् आभारं प्रकटयामि यतो हि भवतां साहचर्यं विना यात्रेयं शक्यैव नासीत् | एवं प्रतीयते यत्, कदाचित् ह्यस्तनमिदं वृत्तं भवेत्, यदा वयं सर्वे सम्भूय वैचारिकयात्रेयम् आरब्धवन्तः | तदा चतुर्दशोत्तर-द्विसहस्रतमे वर्षे ओक्टोबरमासस्य तृतीये दिने, विजयदशम्याः पावनं पर्व अवर्तत, तथा च, संयोगम् अवलोकयन्तु, अद्य, होलिकादहनं वर्तते | 'एकस्मात् दीपात् ज्वलेत् अपरः, भासेत च राष्ट्रमस्मदीयम्' - भावनामेनाम् आधृत्य सततं प्रचलन्तः वयम् एतावन्तं मार्गम् अतिक्रान्तवन्तः | वयं देशस्य नाना-कोणेषु स्थितैः जनैः संभाषितवन्तः, तेषाञ्च असाधारणानां कार्याणां विषये ज्ञातवन्तः | भवन्तः अपि अनुभूतवन्तः स्युः यत्, अस्माकं देशस्य दूर-सुदूरवर्तिषु कोणेष्वपि, कियती अभूतपूर्वा क्षमता वरीवर्तते | भारतमातुः अङ्के कीदृशानि रत्नानि संपुष्णन्ति | एतद्धि स्वस्मिन् अपि समाजं प्रति अवलोकयितुं, समाजम् अवगन्तुं, समाजस्य च सामर्थ्यम् अभिज्ञातुं, मम कृते तु अन्यतमः अद्भुतः अनुभवः अवर्तत | एतेषु पञ्चसप्ततौ आख्यानेषु कियन्तः विविधाः विषयाः परिभाविताः | कदाचित् नद्याः वृत्तं कदाचिच्च हिमालयस्य शिखराणां विवरणम्, कदाचित्तु रण-प्रदेशस्य वृत्तं, कदाचित् प्राकृतिकापदा-वृत्तानि, तर्हि कदाचित् मानव-सेवायाः अगणितानां कथानाम् अनुभूतिः, कदाचित् प्रविधेः आविष्कारः, तर्हि कदाचित् कस्मिञ्चित् अज्ञाते कोणे, किञ्चित् अभिनवं कर्तुं प्रदर्शयितुं च कस्यचित् अनुभवस्य कथा | अधुना भवन्तः पश्यन्तु, भवेत् स्वच्छतायाः वृत्तं वा स्यात् अस्मदीयस्य रिक्थस्य सन्धारणस्य चर्चा, तथा च न केवलम् एतावदेव, क्रीडनकानां निर्माणस्य वृत्तं वा भवेत्, किं किं नासीत्? कदाचित्, अनेके एतादृशाः विषयाः अस्माभिः परिशीलिताः, स्यात् तेऽपि अगणिताः भविष्यन्ति | अत्रान्तरे,

वयं काले काले महतीभ्यः विभूतिभ्यः श्रद्धाञ्जलीन् अर्पितवन्तः, तासां विभूतीनां विषये अभिज्ञातवन्तः, भारतस्य निर्माणे यासाम् अतोलनीयं योगदानमासीत् | वयम् अनेकान् वैश्विकविषयान् अपि चर्चितवन्तः, तेभ्यः प्रेरणाम् आदातुं प्रयतितवन्तः | नूनमहं कथयिष्यामि यत् 'मनकीबात'-प्रसारणं केन प्रकारेण समृद्धम् अभवत्! विविधताभरितं कथम् अभवत्! एतस्मिन् स्वत्वं कथम् अवर्तत! - अस्य पृष्ठभूमौ मूलकारणम् आसीत् - भवतां सर्वेषां योगदानम् | अनेकानि वृत्तानि भवन्तः मां सूचितवन्तः, नानाविधान् च विचारान् मह्यं दत्तवन्तः | अन्यतम-प्रकारेण, अस्यां विचारयात्रायां, भवन्तः सर्वे, युगपदेव प्रचलन्तः आसन्, आत्मानं संयोजयन्तः अवर्तन्त, तथा च,किञ्चिदपि नवीनं योजयन्तः अपि प्रावर्तन्त | अहमद्य, अस्य पञ्च-सप्ततेः आख्यानस्य अवसरे, प्रप्रथमं 'मनकीबात'-प्रसारणं सफलीकर्तुं, समृद्धञ्च विधातुं, तथा चामुना सततम् आत्मानं संयोजयितुं प्रत्येकमपि श्रोतुः प्रभूतम् आभारं प्रकटयामि |

मम प्रियाः देशवासिनः, पश्यन्तु कियत्सुखदः संयोगः यन्मया 'मनकीबात'-प्रसारणस्य पञ्चसप्ततितमम् आख्यानं प्रस्तोतुम् अवसरः लब्धः, अस्मिन्नेव मासे स्वतन्त्रतायाः पञ्चसप्ततितमवर्षस्य 'अमृतमहोत्सव'स्य आरम्भः जातः । अमृतमहोत्सवः दाण्डीयात्रादिवसे आरब्धः सन् द्विसहस्रोत्तर-त्रयोविंशतितमे वर्षे ऑगस्टमासस्य पंचदशदिनांकं यावच्च प्रचलिष्यति। अमृतमहोत्सवसम्बद्धाः कार्यक्रमाः अखिलदेशे सततमायोज्यन्ते। भिन्नस्थानेभ्यः एतेषां कार्यक्रमाणां सूचनाः चित्राणि च जनाः संविभाजयन्ति । नमोएप्-उपरि एतादृशैः चित्रैस्साकं झारखण्डस्य नवीनेन मह्यं सन्देशः प्रेषितः। असौ लिखति यत्तेन अमृतमहोत्सवस्य कार्यक्रमान् दृष्ट्वा निर्धारितं यदसौ हि स्वातन्त्र्य-संग्राम-सम्बद्धानां न्यूनान्न्यूनं दश-स्थानानां यात्रां विधास्यति । तस्य सूच्यां प्रथम-गन्तव्यं भगवतो बिरसामुण्डावर्यस्य जन्मस्थलमस्ति । नवीनेन लिखितं यज्झारखण्डस्य आदिवासि-स्वातन्त्र्य-सैनिकानां गाथाम् असौ देशस्य अन्यान्य-भागेषु प्रसारयिष्यति। नवीनभ्रातः! एतन्निर्णयार्थमहं भवते शुभकामनाः व्याहरामि।

सखायः! कस्यचित् स्वातन्त्र्य-सैनिकस्य संघर्षगाथा भवेत्, वा कस्यचित् स्थानस्य इतिहासः स्यात्, तत्सर्वम् अमृतमहोत्सवे अखिलदेशे प्रसारणीयम्, तैश्च देशवासिनः संयोजनीयाः। भवन्तः द्रक्ष्यन्ति यत्सत्वरमेव अमृतमहोत्सवः प्रेरणास्पदम् अमृतबिन्दुभिः आपूरितः भविष्यति, तेन चाद्भुताऽमृतधारा प्रवहिष्यति, या हि अस्मान् स्वतन्त्रतायाः शतवर्षाणि यावत् उत्प्रेरयिष्यति, देशम् उच्चशिखराणि नेष्यति, किमपि विशेषं कर्तुं च भावान् उत्पादयिष्यति । स्वतन्त्रतासंघर्षे

अस्मत्सैनिकैः अगणितानि कष्टानि सोढानि यतो हि ते देशहितस्य कृते त्यागं बलिदानं च स्वीयकर्त्तव्यत्वेन अभिजानन्ति स्म । तेषां त्याग-बलिदान-गाथाः अस्मान्सततं कर्त्तव्यमार्गे प्रेरयन्ति । भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायां निगदितं यत् -

'नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।'

एतेनैव भावेन वयं सर्वे स्वीय-नियतकर्मणाम् अनुपालनं पूर्णनिष्ठया करवाम । स्वतन्त्रतायाः अमृतमहोत्सवस्य एषः भावः यद्वयं नूतनसंकल्प-साधनां करवाम । तदनु च तत्संकल्पसिद्धये प्राणपणेन सन्नद्धाः भवेम । एतैः संकल्पैः समाजस्य देशस्य च कल्याणं भवतु, भारतस्य भविष्यत् चोज्ज्वलं भवतु । संकल्पेऽस्मिन् आत्मनो दायित्वं कर्त्तव्यञ्च संवलिते भवितव्ये । मम विश्वासः अस्ति यत् श्रीमद्भगवद्गीतायाः सन्देशानुसरणस्य एषः स्वर्णावसरः अस्माभिरधिगतः।

मम प्रियाः देशवासिनः, विगतवर्षे मार्चमासे जनैः सर्वप्रथमं 'जनता-संचाररोधः' इति शब्दः श्रुतः आसीत् । परमेतस्य महद्देशस्य महत्याः प्रजायाः महानुभवं पश्यन्तु! यज्जनता-संचाररोधः सम्पूर्ण-विश्वस्य कृते अपूर्वानुभवः जातः। एषो हि अनुशासनशक्तेः अद्भुतानुभवः अवर्तत, यस्य कृते भाविन्यः सन्ततयः

गर्वमनुभविष्यन्ति। एवमेव स्थालीशब्देन, करतालेन, दीपप्रज्ज्वालेन चास्माकं कोरोनायोद्धॄन् प्रति सम्मान-प्रकाशनमपि अस्ति। भवन्तः अनुमानमपि कर्तुं न शक्नुवन्ति यदेषो हि अवसरः कोरोनायोद्धॄणां कृते कियान् हृदयस्पर्शी अवर्तत । एतेनैव प्रोत्साहनेन ते आवर्षम् अक्लान्ताः भवन्तः सततं सेवारताः अवर्तन्त । देशस्य एकैकस्य नागरिकस्य प्राणरक्षार्थं संघर्षरताः अभवन् । विगते वर्षे एतत्समये प्रश्नः आसीद् यत् कोरोनानिवार-कौषधिः कदा यावद्विकसितः भविष्यति।

सखायः! अस्माकं कृते गर्वास्पदमिदं यद्भारतमद्य विश्वस्य बृहत्तमं सूच्यौषधि कार्यक्रमं संचालयति । एतत्कार्यक्रमस्य चित्राणां विषये भुवनेश्वरस्य पुष्पाशुक्ल-महाभागया लिखितं यद्गृहस्य वरिष्ठसदस्येषु सूच्यौषधि-विषये यः उत्साहः दृश्यते, तस्य चर्चा मया 'मनकीबात'-प्रसारणे करणीया ।

सखायः! एतत्सत्यमस्ति यद्देशस्य प्रतिकोणं वयमेतादृक्-वृत्तानि शृणुमः, चित्राणि च पश्यामः यान्य- स्माकं हृदयं स्पृशन्ति । उत्तरप्रदेशे जौनपुरस्य नवोत्तर-शतवर्षीय-वृद्धया रामदुलैया-मात्रा सूच्यौषधम् अधिगतम् । एवमेव देहल्याः सप्तोत्तर-शतवर्षीयेण श्रीकेवलकृष्णेन सूच्यौषधं सेवितम् । हैदराबादे शतवर्षीयेण जयचौधरी- वर्येणापि ओषधिरेष अवाप्तः, सर्वे चैतस्य सेवनार्थं अध्यर्थिताः। अहं ट्विटर्-फेस्बुक्-चेत्यत्र पश्यामि यज्जनाः स्वीयपरिवारस्य वयोवृद्धेभ्यः एतदौषधस्य उपसेवनानन्तरं तेषां चित्राणि संविभाजयन्ति । केरळस्य युवकेन आनन्दन्-नायरेण तु अस्य कृते 'वैक्सीन-सेवा' इति नूतनाभियानमपि संचालितम् । एतादृशाः एव सन्देशाः दिल्लीतः शिवान्या, हिमाचलतः हिमांशुना अन्यैश्च युवजनैः प्रेषिताः। अहं भवतां सर्वेषामेव श्रोतॄणां विचाराणां प्रशंसां करोमि । एतेन साकमेव कोरोनां विरुद्ध्य संघर्षस्य मन्त्रमपि स्मरन्तु - योऽस्ति - "दवाई भी - कड़ाई भी"- 'औषधमपि कठोरानुशासनमपि।' एतत्केवलं नैव कथनीयम् अपितु करणीयमपि, अन्येभ्यश्च सूचयितव्यमस्ति । सर्वे जनाः "दवाई भी - कड़ाई भी" इत्यस्य कृते प्रतिबद्धाः अपि करणीयाः सन्ति ।

मम प्रियाः देशवासिनः, मयाऽद्य इन्दौर- वासिन्यै सौम्यायै धन्यवादः करणीयः। तया एकं महत्त्वाधायि-विषयं प्रति ममावधानम् आकर्षितम् । अस्य चर्चा च 'मनोगतम्'-इत्यत्र करणीया इति अध्यर्थितम् । अयं विषयः अस्ति - भारतस्य क्रिकेट्-क्रीडिकायाः मितालीराजमहाभागायाः नूतनं कीर्तिमानम् । मिताली-महोदया नातिचिरम् आन्ताराष्ट्रिय-क्रिकेट्-स्पर्धासु दशसहस्रधावनांकानाम्

अर्जयितृषु प्रथमा भारतीया महिला क्रिकेट्क्रीडिका संजातास्ति । तस्याः अस्यै उपलब्धये बहूनि वर्धापनानि। मितालीवर्या आन्ताराष्ट्रिय-क्रिकेट्-स्पर्धायां सर्वोच्चोपलब्धिकर्तृषु अन्यतमा क्रीडिकास्ति। एकदिवसीयान्ताराष्ट्रिय-स्पर्धासु सप्तसहस्रधावनांकानाम्  अर्जनकर्त्री असौ एकैवान्ताराष्ट्रिय-महिला क्रीडिकास्ति। महिलाक्रिकेट्-क्षेत्रे तस्याः योगदानं अतीवाद्भुतमस्ति। स्वीय-द्विदशकाधिके खेलावधौ मितालीराजवर्यया सहस्रशः लक्षशः च जनाः उत्प्रेरिताः |  तस्याः कठोरपरिश्रमस्य सफलतायाश्च गाथा न केवलं महिलानाम् अपितु पुरुषक्रीडकानां कृते चापि सम्प्रेरिका वर्तते।

सखायः! एतद्धि रोचकमस्ति यत् अस्मिन्नेव मार्चमासे यदा वयं महिलादिवसस्य आयोजनं कुर्वन्तः स्मः तदा अनेकाभिः महिलाक्रीडिकाभिः बहूनि पदकानि  कीर्तिमानानि च अधिगतानि । देहल्यामायोजितायाम् 'आई.एस्.एस्.एफ्.विश्वचषक-लक्ष्यवेध-स्पर्धायां भारतं शीर्षस्थानेऽवर्तत । भारतेन विजितानां स्वर्णपदकानां संख्या सर्वाधिकाऽसीत्। इदं हि भारतस्य महिला-पुरुषाणां लक्ष्यवेधकानाम् उत्कृष्टप्रदर्शनेनैव सञ्जातम्। अस्मिन्नेव समये पी.वी.सिन्धुना 'बी.डब्ल्यू.एफ्.स्विस्-ओपन्-सुपर- त्रिशतमितायां स्पर्धायां रजतपदकं विजितम् । अद्य शिक्षातः उद्यमितां यावत् सशस्त्रसेनातश्च विज्ञानप्रविधिं यावत् प्रत्येकं क्षेत्रे पुत्र्यः स्वीयाभिज्ञानं स्थापयन्ति । व्यावसायिक-चयनरूपे क्रीडाः यूनां प्राथमिकतायाम्  आगच्छन्ति । क्रीडासु महिलानामुपलब्धयः प्रेरणास्पद-छवयश्च सततं अभिवर्धमानाः वर्तन्ते ।

मम प्रियाः देशवासिनः, कतिपय-दिनपूर्वम् आयोजितं भारतीय-सामुद्रिकशिखरसम्मेलनं स्मर्यते वा? अस्मिन्शिखरसम्मेलने मया किम् आख्यातमासीत्? अपि वा कोऽपि स्मरति? स्वाभाविकमिदं - बहवो कार्यक्रमाः भवन्ति, बहुविध-वक्तव्यानि जायन्ते, प्रत्येकं तु स्मर्तुं नैव शक्यते, एतत्स्वाभाविकमस्ति । परं यदा मया ज्ञातं यन्ममाग्रहः गुरुप्रसाद-वर्येण सावधानं संधारितः तदाऽहं विस्मितः अभवम् । अस्मिन् सम्मेलने मया देशस्य प्रकाशस्तम्भ-परिक्षेत्रेषु पर्यटनसुविधानां विकासार्थम् आकारितमासीत् । गुरुप्रसाद-महाभागेन तमिलनाडोः चेन्नई-महाबलीपुरम्-इत्यनयोः

प्रकाशस्तम्भयोः द्विसहस्रोत्तरैकोनविंशवर्षे विहितायाः स्वीययात्रायाः विषये वर्णितमस्ति। तेन अतीवरोचक-तथ्यानि प्रकाशितानि येन अस्य 'मनकीबात'-प्रसारणस्य श्रोतारोऽपि विस्मिताः भविष्यन्ति । यथा चेन्नई-प्रकाशस्तम्भः विश्वस्य कतिपयेषु प्रकाशस्तम्भेषु अन्यतमः अस्ति, यस्मिन् एलिवेटर्-इत्युद्वाहकं स्थापितं वर्तते । एषः भारतस्य एक एव प्रकाशस्तम्भः योहि नगरसीमायां स्थापितः। अस्मिन्  विद्युत्-संचाराय सौरपटलानि अपि स्थापितानि । श्रीगुरु- प्रसादेन प्रकाशस्तम्भस्य संग्रहालयविषयेऽपि लिखितमस्ति येन भारतस्य सामुद्रिकेतिहासः प्रकाशितः भवति । संग्रहालये तैलचालिताः बृहद्वर्तिकाः मृत्तैलप्रकाशकाः, शिलातैलवाष्पकाः, पुराकाले प्रयोज्यमानाश्च विद्युद्दीपाः प्रदर्शिताः वर्तन्ते । भारतस्य प्राचीनतमस्य महाबलीपुरम्-प्रकाशस्तम्भस्य विषयेऽपि श्रीगुरुप्रसादेन सविस्तरं लिखितम् । तेनोक्तं यदेनं प्रकाशस्तम्भं निकषा शतशो वर्षप्राचीनं पल्लवनृपेण महेन्द्रवर्मणा निर्मापितम् 'उल्कनेश्वरा'-मन्दिरमस्ति ।

सखायः! "मनकीबात"-प्रसारणस्य अवधौ अहं पर्यटनस्य विभिन्नपक्षाणां चर्चाम् अनेकवारं कृतवान् परम् एते light house-इति प्रकाशस्तम्भाः पर्यटनदृष्ट्या अन्यतमाः भवन्ति । स्वीयाभिः भव्यसंरचनाभिः प्रकाश- स्तम्भाः सर्वदैव जनानाम् आकर्षणकेन्द्राणि भवन्ति। पर्यटन-सम्वर्धनार्थं भारते अपि एकसप्तति-संख्याकाः प्रकाशस्तम्भाः चिह्नीकृताः । एतेषु सर्वेषु उपक्रमेषु क्षमतानुसारं सङ्ग्रहालयः, वर्तुलाकारा रङ्गशाला, मुक्ताकाशीया नाट्यशाला, जलपानगृहम्, बालोद्यानम्, ईकोफ्रेण्डली-इति पर्यावरणानुकूलाः कुटीराः, भूसुदर्शनी- करणं च सन्नद्धीकरिष्यन्ते । यतः प्रकाशस्तम्भानां प्रसंगः चलति अतः एकस्य विशिष्टस्य प्रकाशस्तम्भस्य विषये ज्ञापयितुम् इच्छामि । एषः प्रकाशस्तम्भः गुजरातस्य सुरेन्द्रनगर- जनपदस्य जिन्झुवाडा-नामके स्थाने अस्ति । किमु जानन्ति भवन्तः किमर्थम् एषः प्रकाशस्तम्भः विशिष्टः? यतः हि यत्र एषः प्रकाशस्तम्भः अस्ति ततः समुद्रतटः इदानीं शतकिलोमीटरतः अपि दूरम् वर्तते । अस्मिन् ग्रामे भवन्तः तादृशान् पाषाणान् अपि प्राप्तुं शक्नुवन्ति ये बोधयन्ति यत् पुरा अत्र कदाचित् व्यस्तं नौपत्तनम् अभविष्यत्

। एतस्य अभिप्रायः, पूर्वं समुद्रतटः जिञ्झुवाडा-पर्यन्तम् आसीत् । समुद्रस्य क्षयः वर्धनं पृष्ठगमनं दूरीभवनं च एतस्य एकं स्वरूपम् अस्ति । अस्मिन् एव मासे जापानतः आगतस्य सुनामीप्रकरणस्य दशवर्षाणि पूर्णानि भविष्यन्ति । अस्मिन् सुनामीप्रसङ्गे सहस्रशः जनाः मृत्युम् उपगताः आसन् । एतादृशं सुनामीप्रकरणं भारते चतुरधिक-द्विसहस्रतमे वर्षे आगतम् आसीत् । सुनामीप्रकरणे प्रकाशस्तम्भे कार्यरताः चतुर्दश-कार्मिकाः हुतिंगताः, अण्डमाननिकोबारे तमिलनाडु- राज्ये च स्थितेषु प्रकाशस्तम्भेषु ते दायित्वं निर्वहन्तः आसन् । अस्माकं भूरिपरिश्रमकर्तॄन् प्रकाशव्यवस्थापकान् अहं सादरं श्रद्धाञ्जलिं समर्पयामि, एतेषां कार्यं च भूरिशः प्रशंसामि ।

प्रियाः देशवासिनः! जीवनस्य प्रत्येकं क्षेत्रे नूतनत्वम् आधुनिकता च अनिवार्या भवति अन्यथा तत्कर्म अस्मभ्यं कदाचित् भारवद् भवेत् । भारतस्य कृषिजगति आधुनिकता कालापेक्षिता वर्तते । अतिविलम्बः जातः । अस्माकं बहु समयः नष्टः । कृषिक्षेत्रे वृत्त्यवसान् स्रष्टुं, कृषकाणाम् आयं च द्विगुणीकर्तुं, परम्परागत-कृषिमाध्यमैः सह नवविकल्पाः, नवाचाराः च नूनं प्रयोक्तव्याः । श्वेत- क्रान्ति समये देशेन इदम् अनुभूतम् । इदानीं मधुमक्षिका- पालनम् अपि विकल्पत्वेन ख्यायितम् । मधुमक्षिकापालनं देशे मधुक्रान्तेः मिष्टक्रान्तेः वा आधारभूतं भवति । अधिक-संख्यायां कृषकाः अनेन सम्बद्धाः जायन्ते, नवाचारान् च कुर्वते । यथा हि पश्चिमबङ्गालस्य दार्जिलिंग्-स्थाने एकः गुरदुमनामकः ग्रामः अस्ति । पर्वतानाम् अत्यौन्नत्यं, भौगोलिक्यः च समस्याः, परम् अत्रत्यजनैः मधुमक्षिका- पालनोद्योगः आरब्धः, फलतः स्थानेऽस्मिन् निर्मितं मधु सर्वे वाञ्छन्ति । अनेन कृषकाणाम् आयः अपि समेधितः । पश्चिमबंगालस्य एव सुन्दरवन-क्षेत्रस्य प्राकृतिकमधु देशे विदेशेषु च अभिलष्यते । मम एतादृशः एव व्यक्तिगतः अनुभवः गुजरातस्य अपि अस्ति । गुजरातस्य बनासकांठा-स्थाने षोडशाधिकद्विसहस्रतमे वर्षे एकम् आयोजनम् अभवत् । तस्मिन् कार्यक्रमे अहं जनान् प्रति अवदम् यद् अत्र नैकाः सम्भावनाः सन्ति । किमर्थं न बनासकांठा-क्षेत्रस्य अस्माकं च कृषकाः मिष्टक्रान्तेः नूतनम् अध्यायं लिखेयुः? भवन्तः ज्ञात्वा

प्रसन्नाः भविष्यन्ति यत् अत्यल्पे एव समये बनासकांठा-क्षेत्रं मधूत्पादनस्य प्रमुखं केन्द्रं जातम् । अद्य बनासकांठा-क्षेत्रस्य कृषकाः मधुना एकस्मिन् वर्षे लक्षशः रूप्यकाणि अर्जयन्ति । एतादृशम् एव उदाहरणं हरियाणाराज्यस्य यमुनानगरस्य अपि अस्ति । यमुनानगरे कृषकाः मधुमक्षिका-पालनं कृत्वा प्रतिवर्षं शतशः टनपरि- मितम् उत्पादनं कृत्वा स्वीयम् आयम् वर्धयन्तः सन्ति । कृषकाणाम् अस्य परिश्रमस्य फलमेव यत् देशे मधुनः  उत्पादनं नित्यं वर्धमानम् अस्ति । वर्षे प्रायशः सपादलक्ष-टनपरिमितं मधु उत्पाद्यते, इतश्च प्रभूतमात्रायां मधुनः विदेशेभ्यः निर्यातम् अपि क्रियते ।

सखायः! मधुमक्षिका-पालनोद्योगे न केवलं मधुना आयः भवति प्रत्युत BeeWax-इति मधुलाक्षा अपि आयस्य मुख्यायामः अस्ति । Pharma industry, food industry, textile, cosmetic industry- चेत्येतेषु सर्वेषु उद्योगेषु मधुलाक्षायाः अपेक्षा वर्तते । अस्माकं देशः सम्प्रति मधुलाक्षायाः आयातं करोति परम् अस्माकं कृषकाः स्थितिम् इमां शीघ्रं परिवर्तयितुं यतन्ते । अर्थात् एकदृष्ट्या आत्मनिर्भरं भारतम् इत्यस्मिन् अभियाने सहयोगिनः सन्ति । अद्य समग्रं विश्वं आयुर्वेदं प्राकृतिक-स्वास्थ्योत्पादान् च पश्यद् अस्ति । एतादृशे काले मधुनः अपेक्षाः नित्यं वर्धन्ते। अहम् इच्छामि देशस्य अधिकाधिकाः कृषकाः कृषिकार्येण सहैव मधुमक्षिका-पालनोद्योगेन संयुक्ताः भवन्तु । एनेन तेषाम् आयः अपि वर्धिष्यते, जीवने सुखमपि भविष्यति ।

मम प्रियाः देशवासिनः! कतिपय-दिनानि पूर्वमेव World Sparrow Day इति विश्व-चटका-दिवसः आमानितः। Sparrow इत्युक्ते गौरैया इति भाषायाम् । कुत्रचित् एषा चकली, कुत्रचित् चिमनी, क्वचित् च घान-चिरिका इति कथ्यते । पुरा अस्माकं गृहस्य भित्तिषु, परिपार्श्ववर्तिषु वृक्षेषु च गौरैया कूजति स्म । परम् इदानीं जनाः गौरैयां स्मरन् एवं कथयन्ति यत् विगतवारं बहोः कालात् पूर्वं गौरैया दृष्टा आसीत् । अद्य एतां रक्षितुं  प्रयत्नरताः स्मः । वाराणसीतः मम सहयोगिना इन्द्रपाल- सिंहबत्रावर्येण एतादृशं कार्यं कृतम्, तदहं मनोगतस्य श्रोतृ-

भ्यः अवश्यं कथयितुम् वाञ्छामि । बत्रामहोदयेन स्वगृहमेव गौरैयागृहं कृतम् । एतेन महोदयेन गृहे काष्ठस्य एतादृशाः नीडाः निर्मापिताः येषु गौरैया सहजतया निवसेत् । साम्प्रतं वाराणस्याः अनेकानि गृहाणि अनेन अभियानेन आत्मानं संयोजयन्ति । अनेन गृहेषु अद्भुतं प्राकृतिकं वातावरणम् अपि निर्मीयते । अहम् इच्छामि प्रकृतये, पर्यावरणाय, प्राणीभ्यः, पक्षीभ्यश्च, येभ्यः अपि सम्भवेत्, अस्माभिः अपि यथासम्भवं न्यूनाधिकाः प्रयासाः अवश्यं करणीयाः । यथा एकः सहयोगी अस्ति - बिजयकुमार-काबीमहोदयः । बिजयमहोदयः ओडिशाराज्यस्य केन्द्रपाडा-जनपदस्य निवासी अस्ति । केन्द्रपाडास्थानं समुद्रतीरे अस्ति । अतः अस्य जनपदस्य नैके ग्रामाः तादृशाः सन्ति येषाम् उपरि उच्च-तरङ्गानां सामुद्रिक-झञ्झावातस्य च सङ्कटं सततं भवति । नैकवारम् एतेन हानिः अपि भवति । बिजयमहोदयः अपि अनुभूतवान् यत् प्राकृतिकापद्द्वारा संरक्षणं तु प्रकृत्या एव सम्भाव्यते । ततः परं किम् अभवत् - बिजयमहोदयः बडाकोट-ग्रामतः अभियानम् आरभत । द्वादशवर्षाणि....... सखायः! द्वादशवर्षाणि, परिश्रमं कृत्वा ग्रामात् बहिः समुद्र- दिशि पञ्चविंशति-प्रहेल-परिमितं mangroveइति बृहत्तालीयं वनं कृतम् । अद्य एतत् वनं अस्य ग्रामस्य रक्षां कुरुते । एतादृशम् एव कार्यम् ओडिशायाः पारादीपजनपदस्य अभियन्त्रा अमरेशसामन्तेन कृतम् । अमरेशमहोदयेन लघुलघूनि वनानि आरोपितानि यैः बहूनां ग्रामाणां रक्षणं जायते ।

सखायः! एतादृशेषु कार्येषु यदि वयं समाजं योजयामः तर्हि बृहत्परिणामाः आयान्ति । यथा तमिलनाडोः कोयम्बटूरे लोकयान-परिचालकः मरिमुथु-योगनाथन्-महोदयः वर्तते । योगनाथन्-महोदयः लोकयाने चिटिकाप्रदान-समये यात्रिभ्यः एकं पादपम् अपि निःशुल्कं ददाति ।अनेन प्रकारेण योगनाथन्-महोदयः न जाने कति वृक्षान् आरोपितवान्? योगनाथन्-वर्यः स्ववृत्तेः अधिकांशम् अस्मिन् एव कर्मणि व्ययीकुर्वन् अस्ति । एतत् श्रुत्वा इदानीं कः न मरिमुथु-योगनाथन्-वर्यस्य कार्यं प्रशंसेत्? अहं हृदयेन तस्य एतादृशान् प्रेरककार्य-संवलितान् प्रयासान् शुभकामनाभिः वर्धापयामि।

मम प्रियाः देशवासिनः, wasteतः wealth-इत्युक्ते अवकरतः कञ्चननिर्माण-विषये अस्माभिः दृष्टम् अपि, श्रुतम् अपि, अथ च अन्ये बोधिताः अपि सन्ति । तद्वदेव अवकरतः मूल्यत्वेन परिवर्तनस्य कार्यम् अपि प्रचलत् अस्ति । एतादृशम् एव उदाहरणम् अस्ति केरळस्य कोच्चिस्थस्य सेण्ट-टेरेसा-महाविद्यालयस्य । अहं स्मरामि यत् सप्तदशाधिक-द्विसहस्रतमे वर्षे अहम् अस्य महाविद्या- लयस्य परिसरे एकस्मिन् पुस्तक-पठनाधारिते कार्यक्रमे सहभागितां कृतवान् । अस्य महाविद्यालयस्य विद्यार्थिनः पुनःप्रयोज्य-क्रीडनकानां निर्माणं कुर्वन्तः सन्ति, तदपि अत्यन्तं रचनात्मकविधिना । एते छात्राः पुरातनवस्त्रैः, क्षिप्तानां स्यूत-पेटिका-काष्ठखण्डानां प्रयोगेण च क्रीडनकानि निर्मान्ति । कश्चन् विद्यार्थी puzzle-इति प्रहेलिकां, तर्हि अन्यः कारयानं रेलयानं वा निर्माति । अत्र विशेषेण अवधी- यते यत् क्रीडनकानि सुरक्षितानि, बालेभ्यः च अनुकूलानि भवेयुः । अस्य पूर्णप्रयासस्य एका उत्तमा वार्ता एषा यद् इमानि क्रीडनकानि बालेभ्यः क्रीडनार्थं प्रदीयन्ते । अद्य यदा भारतम् क्रीडनकानां निर्माणे अग्रे वर्धमानम् अस्ति तदा अवकरेभ्यः मूल्य-निर्माणाभियानस्य अभिनवः प्रयोगः महत्त्वम् आदधाति।

आन्ध्रप्रदेशस्य विजयवाडा-जनपदे एकः आचार्यः श्रीनिवासपदकाण्डला अस्ति । असौ अतिरोचकं कार्यं कुर्वन् वर्तते । तेन Automobile Metal Scrap-इत्यनेन प्रतिमाः निर्मिताः सन्ति । तेन निर्मिताः एताः विशालप्रतिमाः सार्वजनिकोद्यानेषु स्थापिताः वर्तन्ते, अथ च जनाः ताः अत्युत्साहेन अवलोकयन्ति । Electronic अथ च Automobile Waste इत्यस्य पुनर्निर्मितेः अभिनवः प्रयोगः एषः। अहम् एकवारं पुनः कोच्चितः विजयवाडातः च कृत- प्रयत्नानां प्रशंसनं करोमि, अथ च आशासे यत् जनाः एतादृशेषु प्रयासेषु अग्रेसराः भवेयुः।

मम प्रियाः देशवासिनः, भारतस्य जनाः विश्वस्य कस्मिन् अपि कोणे गच्छन्ति, तदा सगर्वं कथयन्ति यद् वयं भारतीयाः । अस्माकं योगः, आयुर्वेदः, दर्शनं, अथ च, न जाने किं किम् अस्ति अस्माकं पार्श्वे, यम् आधारीकृत्य वयं गर्वान्विताः भवामः, गर्वविषयिणीं वार्तां कुर्मः, युगपदेव

स्वीयायाः स्थानीयभाषायाः, उपभाषायाः परिचयस्य, वेशस्य, भोजनादिविषयस्य च सन्दर्भेऽपि गर्वम् अनुभवामः । वयं नूतनं तु प्राप्नुयाम, तदैव तु जीवनं भवति, परं सहैव पुरातनं नैव त्यजेम । अतिपरिश्रमेण पार्श्वे विद्यमानं सांस्कृतिक-रिक्थं सम्वर्धयामः नवसन्ततिं यावत् प्रापयेम । एतत् एव कार्यम् अद्य असम-वास्तव्यः सिकारी-टिस्सौ-महोदयः अत्यन्तं मनोयोगेन करोति। Karbi-angling-जनपदस्य सिकारी-टिस्सौ-महोदयः विगतेभ्यः विंशतिवर्षेभ्यः कार्बी-भाषायाः documentation इति प्रलेखीकरणं कुर्वन् अस्ति । कस्मिंश्चित् काले, कस्मिंश्चित् युगे कार्बी-आदि-वासिनां भ्रातृभगिनीनां कार्बी-भाषा अद्य मुख्यधारातः विलुप्ता जायते । श्रीमता सिकारीटिस्सौ-वर्येण निश्चिती-कृतम् यत् स्वीयाम् अभिज्ञान-द्योतिकाम् इमां भाषां सः रक्षयिष्यति । स्वीयैः प्रयासैः च कार्बीभाषायाः विविधाः सूचनाः प्रलिखिताः सन्ति । सः अस्मै प्रयासाय नैकेषां प्रशंसनं पारितोषिकाणि च प्राप्तवान् । मनोगत-माध्यमेन श्रीमते सिकारी-टिस्सौ-वर्याय अहं तु शुभकामनाः यच्छामि एव, परं सहैव देशस्य विभिन्नकोणेषु विद्यमानान् एतादृश-प्रयासकर्तॄन् सर्वान् साधकान् अपि शुभकामनाः प्रयच्छामि ये एकं कर्म स्वीकृत्य आजीवनं कार्यनिरताः सन्तिष्ठन्ते।

मम प्रियाः देशवासिनः, कोऽपि नूतनः आरम्भः सर्वथा विशिष्टः भवति । नवारम्भस्य अभिप्रायः भवति नवसम्भावनाः, नूतनाः प्रयासाः च । अथ च नवप्रयासानाम् अर्थः भवति - नवोर्जा, नवीनोत्साहः च । एतदेव कारणम् अस्ति यत् विभिन्न-राज्येषु क्षेत्रेषु च विविधतायुतायाम् अस्माकं संस्कृतौ नवारम्भः, उत्सवत्वेन आचरणस्य परम्परा अस्ति । एषः च कालः नवारम्भानां नवोत्सवानाम् आगमन- स्य च वर्तते । होलिकापर्व अपि वसन्तोत्सवत्वेन एव आचरणस्य परम्परा अस्ति । यदा वयं रङ्गैः होलिकापर्व आचरन्तः भवामः तदा एव वसन्तः अपि अस्मान् परितः नवरङ्गान् प्रकटीकरोति । अस्मिन् एव समये पुष्पाणां विकसनम् आरभते, प्रकृतिः जीवन्तीव भवति । देशस्य विभिन्नेषु क्षेत्रेषु शीघ्रमेव नववर्षः अपि आचरिष्यते । उगादि भवतु, पुथुण्डू वा, गुडी पडवा भवतु बिहू वा, नवरेह भवतु पोइला वा, अथ बोइशाख बैसाखी वा - पूर्णदेशः हर्षप्रकर्षो- त्साह-

नवसम्भावनानां वर्णेषु आप्लावितः भवति । अस्मिन् एव काले केरळे अपि सुन्दरं पर्व 'विशु' इति आमान्यते । एतदनन्तरं शीघ्रमेव चैत्र-नवरात्रेः पावनावसरः अपि आगमि- ष्यति । चैत्रमासस्य नवमे दिने अस्माकं देशे श्रीरामनवमी- पर्व आचर्यते । एतत् भगवतः श्रीरामस्य जन्मदिवसेन सहैव न्यायपराक्रमयोः नवयुगरूपेण अपि आमान्यते । अस्मिन् काले चतुर्दिक्षु हर्षेण सहैव भक्तिभावयुतं वातावरणम् अपि जायते यद्धि जनान् निकटम् आनयति, तान् परिवारेण समाजेन च सह योजयति । परस्परं सम्बन्धान् प्रगाढान् करोति । एतेषां पर्वणाम् अवसरे अहं सर्वदेशवासिभ्यः शुभकामनाः प्रयच्छामि।

सखायः! क्रमेऽस्मिन् एप्रिल्-मासस्य चतुर्थे दिने देशः ईस्टर्-पर्व अपि आमानयिष्यति । जीसस्-क्राइस्ट-इत्यस्य पुनर्जीवनस्य उत्सवरूपेण ईस्टर्-पर्व आयोज्यते। प्रतीकात्मकरूपेण कथयामश्चेत् 'ईस्टर्'पर्व जीवनस्य नवारम्भेण सम्बद्धम् अस्ति । 'ईस्टर्' आशानां पुनर्जागरणस्य प्रतीकं वर्तते । अस्मिन् शुभे पावने च पर्वणि अहं न केवलं भारतस्य, अपितु विश्वस्य सर्वान् क्रिस्तीय-मतावलम्बिनः शुभकामनाः प्रकटीकरोमि ।

मम प्रियाः देशवासिनः, अद्य 'मनकीबात'-प्रसारणे वयं 'अमृत-महोत्सवस्य' देशस्य च कृते स्वीय-कर्तव्यानि चर्चितवन्तः | वयम् अन्यपर्वणाम् उत्सवानाञ्चा- पि चर्चां कृतवन्तः | अत्रान्तरे, अपरमपि पर्व आगम्यमानं वर्तते यद्धि अस्मदीयान् साम्विधानिकान् अधिकारान् कर्तव्यानि च स्मारयति | तदस्ति - एप्रिल-मासे चतुर्दशदिने - डॉक्टरबाबा-साहेब-अम्बेडकरस्य जन्मजयंतीपर्व | अस्मिन् क्रमे, 'अमृत-महोत्सवे' तु अवसरोऽयम् इतःपरमपि विशिष्टः अजायत | विश्वसिमि यत् बाबा-साहेब-जन्मजयन्तीमेनां वयम् अवश्यमेव स्मरणीयां विधास्यामः, स्वीयकर्तव्यानि संकल्प्य तस्मै श्रद्धाञ्जलिं दास्यामः | अमुना विश्वासेन सहैव, भवद्भ्यः सर्वेभ्यः पुनरेकवारं पर्वोत्सवानां शुभकामनाः | भवन्तः सर्वे प्रसन्नाः भवेयुः, स्वस्थाः स्युः, सुबहु-समुल्लासम् अनुभवेयुः च | अनया कामनया सहैव पुनरेकवारं स्मारयामि 'औषधमपि - दृढानुशासनमपि' | भूयान्सः धन्यवादाः |

*****

[भाषान्तरं - डॉ.श्रुतिकान्तपाण्डेय-गवीशद्विवेदिभ्यां सम्भूय बलदेवानन्द-सागर-द्वारा]

अणुप्रैषः - baldevanand.sagar@gmail.co